# नवग्रह स्तोत्रम् (वादिराजयति कृतम्)

भास्वान्मे भासयेत्तत्त्वं चन्द्रश्चाह्लादकृद्भवेत् ।
मङ्गलो मङ्गलं दद्याद्बुधश्च बुधतां दिशेत् ॥ १ ॥

गुरुर्मे गुरुतां दद्यात्कविश्च कवितां दिशेत् ।
शनिश्च शं प्रापयतु केतुः केतुं जयेऽर्पयेत् ॥ २ ॥

राहुर्मे रहयेद्रोगं ग्रहाः सन्तु करग्रहाः ।
नवं नवं ममैश्वर्यं दिशन्त्वेते नवग्रहाः ॥ ३ ॥

शने दिनमणेः सूनो ह्यनेकगुणसन्मणे ।
अरिष्टं हर मेऽभीष्टं कुरु मा कुरु सङ्कटम् ॥ ४ ॥

हरेरनुग्रहार्थाय शत्रूणां निग्रहाय च ।
वादिराजयतिप्रोक्तं ग्रहस्तोत्रं सदा पठेत् ॥ ५ ॥

इति श्रीवादिराजयति विरचितं नवग्रह स्तोत्रम् ॥